# ||नमो नमः||

# आचार्यद्वितीयसेमेस्टरछात्राणां कृते वेणीसंहारस्यपाठ्यसामग्री पूर्त्यर्थं अनुमानित प्रश्न, प्रश्नोत्तरावली (चतुर्थपत्रम्)


डा.नीरजतिवारी

अस्सिटेन्टप्रोफेसर ,साहित्यविभागः

राष्ट्रियसंस्कृतसंस्थानम्  (मानितविश्वविद्यालयः)

मानवसंसाधनविकासमन्त्रालयः ,भारतसरकारः

लखनऊपरिसरः, लखनऊ

Emal. neerajtiwaribhu@gmail.com

Mo.no.9450530774

## वेणीसंहारस्य लघु, दीर्घ प्रश्नोत्तराणि

### आचार्य द्वितीय सैमेस्टर

(1) वेणीसंहारस्य कर्ता कः?

उ.→ भट्टनारायणः

(2) वेणीसंहारस्य काव्यविधा का?

उ.→ नाटक

(3) वेणीसंहारस्य मंगलाचरणे छन्दः कः?

उ.→ शिखरिणी

(4) वेणीसंहार नाटकस्य नाटककारस्य समयः

उ.→ 650 - 750 ई.

(5) वेणीसंहार नाटकस्य मूलग्रन्थः कः?

उ.→ ~~[illegible]~~ महाभारत

⑥ वेणीसंहार नाटके नायिका का :?
उ. → द्रौपदी
⑦ वेणीशब्दस्य कोऽर्थः ?
उ. → केशा
⑧ वेणीसंहार नाटके कति अंका: ?
उ. → षट्
⑨ वेणीसंहार नाटकस्य प्रथमाङ्के श्लोक संख्या कति सन्ति ?
उ. → 27 (सप्तविंशति)
⑩ वेणीसंहार नाटकस्य द्वितीयके श्लोक संख्या कति सन्ति ?
उ. → 29 (नवविंशति:)

(11) वेणीसंहार नाटकस्य तृतीयाङ्के श्लोक संख्या सन्ति ?

उ.→ 47 (सप्तचत्वारिंशत्)

(12) वेणी संहार नाटकस्य चतुर्थाङ्के श्लोकसंख्या कति सन्ति ?

उ.→ 15 (पञ्चदश)

(13) वेणीसंहार नाटकस्य पञ्चमाङ्के श्लोक संख्या कति सन्ति ?

उ.→ 42 (द्विचत्वारिंशत्)

(14) वेणी संहार नाटकस्य षष्ठाङ्के श्लोकसंख्या कति सन्ति ?

उ.→ 46 (षट्चत्वारिंशत्)

(15) अश्वत्थामा मातुलस्य नाम किमासीत् ?

उ.→ कृपाचार्य:

(16) "सन्धिं करोतु भवतां नृपतिः पतिना" इयं उक्तिः कस्यासीत् ?

उ. → भीमस्य आसीत् ।

(17) वृकप्रस्थं नाम कस्य स्थानस्य वर्तते ?

उ. → यत्र भीमाय विषप्रयोगः कृतः तत्स्थानम् ।

(18) वारणावतं किं ?

उ. → यत्र जतुगृहदाहः कृतः तत्स्थानाभिधानम् ।

(19) कर्णस्य पुत्रस्य नाम किं आसीत् ?

उ. → वृषसेनः

(20) दुर्योधनस्य पुरोहितस्य किं नाम ?

उ. → सुमित्रः

(21) वृषसेनस्य केन साकं युद्धं बभूव ?

उ. → अर्जुनेन साकम् ।

(22) कर्णं को जघान ?

उ. → अर्जुन:

(23) दुर्योधनस्योरुभंगं कश्चकार

उ. भीम: (भीमसेन:)

(24) वेणी संहार नाटकस्य का रीति: ?

उ. → गौडी रीति: ।

(25) वेणी संहार नाटकस्य प्रमुखो रस: क: ?

उ. → वीररस:

(26) प्रथमाङ्कस्य श्लोक संख्या → 8 (अष्ट), 15 (पञ्चदश), आदि सप्रसङ्ग यथाग्रन्थं श्लोकस्य व्याख्या कार्या:

(27) द्वितीय अंकस्य श्लोक संख्या 1 (प्रथम), 3, 9, 11, 28, आदि यथा ग्रन्थं विलिख्य सप्रसङ्ग व्याख्या विधेया:

(28) तृतीयाङ्कस्य श्लोक संख्या 1, 2, 3, 11, 12, 20, 49 आदि ससंदर्भं व्याख्या कार्या।

(29) राक्षस-राक्षसी संवाद: संक्षेपतया लेखनीय:

(30) चतुर्थाङ्कस्य श्लोक संख्या - 1, 4, 6, 12 - आदि विलिख्य व्याख्या विधेया:

(31) पञ्चमाङ्कस्य श्लोक संख्या - 5, 7, 10, 14, 20, 32, 38, 42, आदि लिख्य सप्रसङ्ग व्याख्या कार्या।

(32) षष्ठाङ्कस्य श्लोक संख्या - 1, 7, 9, 20, 21, 27, 34, 44. आदि लिख्य सप्रसङ्ग यथा ग्रन्थं व्याख्या कार्या:

## 33. वेणीसंहारनाटकस्य सारांशः

**उत्तरम्- ग्रन्थनाम** - वेणीसंहार

**विधा** - नाटकम्

**उपजीव्यम्** - महाभारतम्

**रचनाकारः** - भट्टनारायणः

**नायकः** - मध्यमपाण्डवः भीमः

**प्रतिनायकः** - ज्येष्ठकौरवः दुर्योधनः

**नायिका** - याज्ञसेनी द्रौपदी

**प्रधानरसः** - वीररसः

**प्रमुखगुणः** - ओजगुणः

**रीतिः** - गौडी रीतिः

**वृत्तिः** - आरभटी वृत्तिः

**प्रथमांकसारसंक्षेप:** - भगवत: कृष्णस्य कौरवसभायां सन्धिप्रस्तावप्रस्तोतुं प्रस्थानम्। भीमस्य पंचग्रामाणां सन्धिप्रस्तावविषये रोष:। भीमस्य शस्त्रागारं प्रति प्रस्थानम्। तत्र द्रौपद्या सह विविधवार्तालाप:। कंचुकीद्वारा दुर्योधनस्य संन्धिप्रस्ताव-अस्वीकरणम् कृष्णाय च बन्धनप्रयत्नम् इति सूचना-प्रदानम्। भीमस्य सहदेवेन सह युद्धभूमिप्रस्थानम्।

**द्वितीयांकसारसंक्षेप:** - भीष्म-अभिमन्यु-आदि प्रमुख-वीराणां वीरगति:। दुर्योधनस्य पत्न्यु: भानुमत्या: सूर्यनारायणस्य व्रतम्। दुर्योधनेन व्रतभंगम्। अर्जुनस्य जयद्रथवधाय प्रतिज्ञा। जयद्रथपत्नीदु:शलाया: विलाप:। दुर्योधनस्य आश्वासनं युद्धभूमौ प्रस्थानं च।

**तृतीयांकसारसंक्षेप:** - द्रोणाचार्यस्य वीरगति:। अश्वत्थामाविलाप:। कृपाचार्येण समाश्वसनम्। कर्णस्य द्रोणाचार्यं प्रति अपभाषणं, दुर्योधनस्य समर्थनं च। कृपाचार्येण सेनापतिरूपेण अश्वत्थामा-चयन-प्रस्ताव:। दुर्योधनस्य अस्वीकरणं पुनश्च कर्णाय सेनापतित्वप्रदानम्। अश्वत्थामह: प्रतिज्ञा यावत् कर्ण: न मरिष्यति शस्त्रादिकं न गृह्णामीति। दुर्योधनस्य विपत्तौ प्रतिज्ञां विस्मृत्य अश्वत्थामह: शस्त्रग्रहणप्रयत्न:। आकाशवाण्या प्रतिशेध:। अश्वत्थामह: पश्चाताप:।

**चतुर्थांकसारसंक्षेप: -** युद्धभूमौ मूर्छितदुर्योधनं स्यन्दने आरोह्य सूतेन युद्धभूमात् पलायनम्। दुर्योधनस्य 99 अनुजानां वीरगति:। कर्णपुत्र-वृषसेनस्य वीरगति:। धृतराष्ट्र-गान्धारी-संजय-प्रवेश:। दुर्योधनस्य विलपनम् यत् ज्येष्ठानां पुरत: कथं गच्छानि इति। अनन्तरं सूतेन सह प्रस्थानम्।

**पंचमांकसारसंक्षेप: -** धृतराष्ट्र-गान्धार्यौ: दुर्योधनस्य समीपं गत्वा तस्यालिंगनम्। दुर्योधनविलाप:। कर्णवधसूचना। दुर्योधनस्य एकाकी रणस्थले प्रस्थानम्। भीमार्जुनौ दुर्योधनं अन्वेष्यन्तौ तत्र गच्छत:। दुर्योधनस्य गदायुद्धाय भीमाय पन्थाह्वानम्। अर्जुनस्य अपवारणम्। अश्वत्थामाप्रवेश:। दुर्योधनेन निन्दित: अश्वत्थामाप्रस्थानम्। धृतराष्ट्र-गान्धारी-सहितम् दुर्योधनस्य शल्यशिविराय प्रस्थानम्।

**षष्ठांकसारसंक्षेप: -** गुप्तचरै: दुर्योधनस्यान्वेषणम्। भीमेन सह गदायुद्धम्। चार्वाकराक्षसस्य कपटमुनिवेश: युधिष्ठिराय च भीमवधस्य मिथ्यासूचना। युधिष्ठिरस्य द्रौपद्या सह अग्निसमाधि-सज्जा। कोलाहलेन सह विजयीभीमसेनस्य प्रवेश:। युधिष्ठिरेण भीमस्य प्रगाढालिंगनम्। कृष्णार्जुनयो: प्रवे◌ेश:। व्यास-वाल्मीकि-आदि मुनीभि: युधिष्ठिरस्य राज्याभिषेक:। सर्वेषां श्रीकृष्णं प्रति कृतज्ञता-ज्ञापनम्। भरतवाक्यम्।

# 34.वेणीसंहारनाटकस्य प्रथमाङ्कस्य कथावस्तु-

**प्रथमाङ्कः-**

मङ्गलात्मकनान्दीविधानानन्तरं नेपथ्याज्ज्ञायते यद् भगवान् श्रीकृष्णः सन्धिप्रस्तावं नीत्वा हस्तिनापुरं गतोऽस्ति। वृत्तान्तमिमं विज्ञाय कृतकौरवनाश-प्रतिज्ञस्य भीमस्य क्रोधः प्रदीप्तोऽभूत्। तस्य दुर्योधनादिविनाशमृतेऽन्यत् किमपिसमाधानं मान्यं नास्ति। युधिष्ठिराज्ञामुल्लङ्घ्यापि भीमः कौरवविनाशाय सन्नद्धतां व्यनक्ति। तदैवोद्विग्नमानसा सपरिजना द्रौपदी तमुपागच्छति। भीमः तामुद्विग्नतायाः कारणं पृच्छति। कारणमुपन्यस्तुमाप्तेङ्गिता चेटी व्याहरति-देव! गान्धारीपादवन्दनाय प्रस्थितां देवीमघ मध्येमार्गममिलद् दुर्योधनभार्या भानुमती। सा देवीमुन्मुक्तकेशामवलोक्य सव्यङ्ग्यमवदत्-"अयि याज्ञसेनि! जातेऽपि सन्धिप्रस्तावे कस्मादिदानीमपि ते केशा न संयम्यन्ते" इति। आकर्ण्येदं देव्याः पूर्वमेव मयोदितम्-अयि भानुमति! युष्माकममुक्तेषु केशेषु कथमस्माकं देव्याः केशाः संयम्यन्त इति। चेट्या वाक्पटुतां प्रशंशन् भीमो द्रौपदीमाश्वासयति-शीघ्रमेव दुर्योधनस्य शोणितेन ते वेणीमुत्तंसयिष्यमि। अत्रान्तरे सम्भ्रान्तः कञ्चुकी प्रविश्य सूचयति-दुर्योधनः श्रीकृष्णस्य सन्धिप्रस्तावमस्वीकृत्य तं संयमितुमाज्ञप्त-वान्। भगवांश्च विश्वरूपं प्रदर्श्य सर्वानवधूय इत एवागच्छति। भीमो दुर्योधनस्य मूढतां नीचताञ्चोपहस्य भगवतो पुराणपुरुषत्वं वर्णयति। नेपथ्ये सकोलाहल-मुद्घोष्यते यत्-दुर्योधनस्य कुकृत्यं विज्ञाय यौधिष्ठिरं क्रोध- ज्योतिरुज्जृम्भते। तच्छ्रुत्वा उत्साहितो भीमोऽपि ससहदेवः रणयज्ञमनुष्ठातुं प्रतस्थे।

# 35.वेणीसंहारनाटकस्य द्वितीयाङ्कस्य कथासारः-

**द्वितीयाङ्कः-**

विज्ञाताभिमन्युवधवृत्तान्तो दुर्योधनो जयद्रथप्रमुखान् वीरान् सम्मानयितुं समुत्सुकोऽस्ति, किन्तु प्रातरेव सः प्रियां भानुमतीमुपस्थातुमिच्छति। भानुमती च स्वप्ने सुवर्णनकुलकृतस्ववक्षोवसनापसारणं स्मृत्वोद्विग्ना प्रभात एवामङ्गलनाशाय सपरिवारा देवानर्चयितुं निर्गच्छति। सखीभिरुद्विग्नतायाः कारणे पृष्टे सा सम्पूर्णं स्वप्नोदन्तं कथयति। निकट एव लतान्तरितो दुर्योधनो वृत्तान्तममुमाकर्ण्य पूर्वं स्वप्नघटितमिदमित्यजानन् भानुमत्यां चरित्रदूषणमाशङ्कते, किन्तु पश्चात् स्वप्नवार्त्तेयमिति विज्ञाय निवृत्तशङ्कः बहिरागत्य भानुमत्या सूर्याय दीयमानेऽर्घ्ये स्वयं पुष्पमर्पयितुमिच्छति, किन्तु तत्पुष्पमधः पतति। चाटुपण्डितः सः देवार्चनकालेऽपि चाटुगर्भाभिरुक्तिभिः सह विविधाः कामचेष्टाः करोति। भानुमती तं जायमानानि अमङ्गलानि स्मारयन्ती नियम एवानुतिष्ठति। अकस्मात् भयङ्करं वात्याचक्रमुज्जृम्भते। सर्वे दारुपर्वतप्रासादं प्रविशन्ति। दुर्योधनस्तत्रापि चाटुभिः प्रियामनुकूलयन् कामचेष्टाभ्यो विरतो न भवति। निवृत्ते वात्याचक्रे कञ्चुकी ससम्भ्रमं समागत्य दुर्योधनं रथपताकाभङ्गं सूचयति। अमङ्गलमिद-मुपशमयितुं यावदयं कञ्चुकिनं पुरोहितपार्श्वे प्रेषयति तावज्जयद्रथस्य माता तत्पत्नी दुःशला चागत्य अर्जुनात् जयद्रथं परित्रातुं निवदेयतः। दुर्योधन अहङ्कारपुरःसरं स्वसैन्यपराक्रमं व्याख्याय, ते भयाक्रान्ताबले समाश्वासयति स्वयञ्च रथमारुह्य समरभूमिं प्रति प्रस्थानं करोति।

# 36.वेणीसंहारनाटकस्य तृतीयाङ्कस्य काथसार:-

## तृतीयाङ्कः-

तृतीयाङ्कस्यारम्भः प्रवेशकेन भवति। युद्धे मृतानां वीराणामसृङ्मांसास्वादन-संग्रहपरयोः वसागन्धारुधिरप्रियाख्ययोः राक्षसदम्पत्योः संवादेन ज्ञायते यद् द्रुपदमत्स्यराजभूरिश्रवःसोमदत्तवाह्लीकादि वीराणां वधः सञ्जातोऽस्ति। धृष्टद्युम्नेन द्रोणस्य मस्तकोच्छेदः कृतः। ततः समराङ्गणे संजातं कोलाहल-माकर्ण्य. आयान्तं सक्रोधमश्वत्थामानञ्चावलोक्य भीतावुभौ पलायेते।

इतोऽश्वत्थामा अपशकुनानि. रणात् फलायमानान् कर्णादींश्च विलोक्य

कमप्यनिष्टमाशङ्कते, किन्तु स्वपितुः शौर्ये विश्वस्तोऽसौ भीतान् कर्णादीन् वारयन् यावद्रणाभिमुखं प्रयाति, तावत् सारथिस्तं समस्तं पितृवधवृत्तान्तमावेदयति। तदाकर्ण्यासौ उद्दीप्तकोपानलः सर्वान् एतत्कुकृत्यकर्तृन् कारयितृंश्च हन्तुं प्रतिजानाति। समनन्तरमेवोपस्थितः कृपाचार्यः शोकक्रोधपरीतं तं सान्त्वयति दुर्योधनञ्चोपगम्य तस्य सेनापतित्वं प्रस्तावयति। अनयोः दुर्योधनोपगमनात् पूर्वमेव कर्णो दुर्योधनं गुरोः शस्त्रत्यागकारणत्वेनेदं सूचयति यत्–"द्रोणः अश्वत्थामानं राज्याधिष्ठितं कर्त्तुमिच्छति स्म, युधिष्ठिरमुखात्तस्य मरणवृत्तान्त-माकर्ण्य विरक्तोऽसौ शस्त्रमत्यजत्" इति। एवमश्वत्थामानं प्रति जनितसन्देहोऽपि कुरुराजस्तं पितृवियोगसन्तप्तं सान्त्वयति। उभयोर्वार्ताप्रसङ्गे कर्णः द्रोणमभिलक्ष्य व्यङ्ग्यवचनान्युदीरयति। पितृनिन्दाश्रवणोद्दीप्तकोपः अश्वत्थामा कर्णं भर्त्सयति। उभयोरुग्रो वाक्कलहो भवति। आरोपप्रत्यारोपानन्तरमुभौ खड्गमाकृष्य प्रहर्त्तुमुद्यतौ भवतः। कृपदुर्योधनौ कथमपि तावुपशान्त्वयतः ! अत्रान्तरे नेपथ्ये महान् कलकलो भवति ज्ञायते च यद् भीमो दुःशासनं निहन्ति। कर्णदुर्योधनौ तं परित्रातुं गच्छतः। कृपोऽश्वत्थामा च शिबिरं प्रति प्रतस्थाते।

# 37.वेणीसंहारनाटकस्य चतुर्थाङ्कस्य कथासारः-

**चतुर्थाङ्कः-**

चतुर्थाङ्के नानाकथोपकथनैः कर्णपर्वणि वर्णितस्य कथानकस्य नाटकीयं रूपं कविनोपस्थापितमस्ति। भीमो भीषणसंग्राममपुरःसरं दुःशासनं निहत्य तद्वक्षोरुधिरं पिबति। कर्णेन सह तं परित्रातुं रणे गतो दुर्योधनः भीमप्रहौराहातः संज्ञाशून्यो जायते। सारथिस्तं रणक्षेत्रात् दूरमेकान्तस्थले नयति। लब्धसज्ञोऽसौ सूतमुखाद् दुःशासनवधवृत्तान्तमाकर्ण्य विलपति। अत्रान्तरे सुन्दरकः तत्रागत्य पश्चाज्जातस्य युद्धस्य वृत्तान्तं सूचयति यत्–भीमकृतं दुःशासनवधं विलोक्य रुष्टेन कर्णेन भीमोऽस्त्रैराक्रान्तः तं परित्रातुं सद्यस्तत्र अर्जुनः समागतः। भीमार्जुनावुभौ कर्णमाक्रमताम्। कर्णं शत्रुभिराक्रान्तमालोक्य तत्पुत्रो वृषसेनः सत्वरं तत्राजगाम। सः अर्जुनेन सह शौर्येण संग्रामं चकार किन्तु पश्चाद् अर्जुनवाणैर्व्याविद्धः वीरगतिं लब्धवान्। पुत्रवधामर्षितेन कर्णेन पाण्डवाः समाक्रान्ताः। पाण्डवप्रहारैराहतेन कर्णेनाहं भवत्समीपे प्रेषितः पत्रेणानेन सह। पत्रं पठित्वा



दुर्योधनः कर्णं परित्रातुं पुनः समरे गन्तुमिच्छति किन्तु तदैव तत्र गान्धारीधृतराष्ट्रौ पितरौ समागच्छतः। लज्जितो दुर्योधनः तौ प्रत्यक्षीकर्तुं नेच्छति, सूतश्च तं आश्वासयितुं परामृशति।

# 38.वेणीसंहारनाटकस्य पंचमाड़्कस्य कथासारः-

**पञ्चमाङ्कः-**

पुत्रवधसन्तप्तौ गान्धारीधृतराष्ट्रौ लज्जितमाहतञ्च दुर्योधनं युद्धं विहाय सन्धातुं निवदेयतः किन्तु अहंकारी कृतयुद्धविनिश्चयश्चासौ तयोराग्रहं तिरस्करोति। धृतराष्ट्रः कथयति–"युधिष्ठिरः स्वानुजेषु एकस्याप्यनिष्टं द्रष्टुं नेच्छति अतोऽसौ उपस्थापिते सन्धिप्रस्तावे सद्यः स्वीकरिष्यति।" दुर्योधनोऽपि प्रत्याख्याति–"युधिष्ठरः एकस्यापि भ्रातुः विपदं न दिदृक्षति अहञ्च भ्रातृशतस्य मृत्यौ जातायामपि सन्धिं करवाणि? नैतत् कदापि सम्भाव्यते। पाण्डवान् वा हनिष्यामि स्वयं वा युद्धे वीरगतिं प्राप्स्यामि। भवद्भ्यामपि पुत्रशोकादुत्तर्तुं सगरमार्ग आश्रयणीयः। अत्रान्तरे समरे महान् कोलहलो भवति। ज्ञायते च कर्णवधानन्तरं महाराजः शल्यः युद्धभूमेः पलायते। मर्मवेधकममुं वृत्तान्तमाकर्ण्य दुर्योधनः पुनः मूर्च्छितो भवति। पितरौ तमाश्वासयतः। ततः भीमार्जुनौ तं मृग्यमाणौ तत्रागच्छतः। सर्वे भीता भवन्ति। तत्रार्जुनस्तु सविनयं व्याहरति किन्तु भीमः स्वभावानुकूलं समुद्धतमेवाचरति। दुर्योधनो भीमस्य गर्वोक्तीराकर्ण्य क्रुद्धो भवति कटुवचनैश्च तं भर्त्सयति। अत्रान्तरेरुभयोः कटु वचनदानादानकाले अश्वत्थमा तत्र समायति, कथयति च–"आत्मश्लाघिना कर्णेन रणे यत्कृतं तद् भवता दृष्टमेव, इदानीमहं समागतोऽस्मि, भवता प्रतिकारचिन्ता त्याज्या, अहं पाण्डवान् हनिष्यामि" इति। किन्तु दुर्योधनः कर्णनिन्दकं तं तिरस्करोति। धृतराष्ट्रः अश्वत्थामनम् अनुकूलयितुं सञ्जयं परामृश्यति।

# 39.वेणीसंहारनाटकस्य षष्ठाङ्कस्य कथासारः-

**षष्ठाङ्कः-**

युधिष्ठिरो भीमकृताम् "अद्य सायंकालं यावद् दुर्योधनस्य वधं न करिष्यामि चेत् स्वप्राणांस्त्यक्ष्यामि" इत्येतां प्रतिज्ञां, दुर्योधनञ्च कुत्रापि प्रलीनं विज्ञाय अत्यन्तं चिन्ततोऽस्ति। सः सहदेवमाज्ञापयति दुर्योधनमन्वेष्टुम्। अत्रान्तरे पाञ्चालकः समागत्य सूचयति यत् केनचित् भीमसेवकेन व्याधने सरोवरे प्रच्छन्नस्य दुर्योधनस्य सूचना आनीतास्ति। भीमश्च तत्र गत्वा व्यङ्ग्यगर्भ-गर्वोक्तिभिस्तं निर्भर्त्स्य सरोवरजलञ्चालोड्य बहिः निरसारयत्।

पञ्चपाण्डवानां मध्ये केनापि एकेन सह योद्धुमामन्त्रितोऽसो भीममेव प्रतिद्वद्वित्वेनाचिनोत्। श्रीकृष्णश्च सन्दिशति यत्-"दुर्योधनस्य विनाशो निश्चितोऽतः भवान् राज्याभिषेकसम्भारान् संग्रहीतुं सेवकानादशतु" इति। तदनन्तरं दुर्योधनपक्षपाती चार्वाकाख्यो राक्षसः कल्पितमुनिवेशस्तत्रागत्य सूचयति यत्-गदायुद्धे दुर्योधनेन भीमो व्यापादितः, इदानीञ्च अर्जुनेन सह तस्य युद्धं प्रचलति, करुणं तद्दृश्यमवलोकयितुमक्षमोऽहं ततः प्रस्थितोऽस्मि। हृदयविदारक-मर्मं वृत्तान्तमाकर्ण्य द्रौपदीयुधिष्ठिरौ विक्षिप्ताविव भवतः सद्यश्चाग्निं प्रवेष्टुमुपक्रमतः। ततोऽकस्माद् हतदुर्योधनरक्तलिप्तवपुः द्रौपदीञ्चान्विषन् भीमस्तत्र समागच्छति। सः द्रौपद्या वेणीं कौरवराजासृजा संहर्तुं यावदुपसर्पति तावदाखशिखरुधिरलिप्तवपुषं तं दुर्योधनं विज्ञाय युधिष्ठिरः निर्भर्त्सयन् बाहुपाशे बध्नाति। कञ्चुकिना भीमोऽयं न तु दुर्योधन इत्येवं विज्ञापितस्य युधिष्ठिरस्य भ्रमो निवर्तते। भीमो दुर्योधनासृजा द्रौपद्याः वेणीं संहरते। कृष्णार्जुनादयः सर्वे वीरास्तत्र एकत्रिता भवन्ति। विजयोल्लाससमये वातावरणे भरतवाक्यन्तं नाटकस्य सुखान्तमवसानं भवति।




# इत्यलम्